CHUNILAL GANDHI VIDYABHAVAN
SURAT.

Manuscripts Library
S.P.P.B.

Coll. No. 860

Title Divyanāmanāmamālā stotra.

CHUNILAL GANDHI VIDYABHAVAN, SURAT

Shastri Dinmanishankar Pustak-Bhandara

No. : 860 Subject : Stotra.

Title : Divyanāmnanāmāmrita stotra.

Author : – Scribe : –

Date of the work : – Date of the Ms. : V.S. 1980

Place of the work : – Place of the Ms. : –

Size : 7.5" by 4' Extent : 3 foll.

Language : Sanskrit Script : Devanāgari

Remarks : –

शिवःशरणं॥श्री॥ईस्तुतंशंभोर्येनप्राप्स्यामिकेशव॥नदिदानींमम
चन्द्रस्तोत्रंशीघ्रफलप्रदे॥नारायणउवाच॥अस्तिगुप्ततमंगौरिना
म्नामष्टोत्तरंशतं॥शंभोरहंप्रवक्ष्यामिपठनांशीघ्रकामदं॥२॥अस्य
श्रीशिवाष्टोत्तरशतंदिव्यनामामृतस्तोत्रस्यनारायणऋषिःशिवोदे
वतागौरीशक्तिःध्यानं॥कोटिसूर्यप्रतीकाशंत्रिनेत्रंचंद्रभूषणं॥शूल
खड्गगदाचक्रकुंतपाशधरंविभुं॥३॥वरदाभयहस्तंचसर्वाभरणभूषि
तं॥एवंध्यात्वार्चयेद्देवंमहाभक्तिसमन्वितः॥४॥शिवोमहेश्वरःशं
भुःपिनाकीशशिशेखरः॥वामदेवोविरूपाक्षःकपर्दीनीललोहितः॥

१

शंकरःशूलपाणिःखट्वांगीविष्णुवल्लभः॥शिपिविष्टोंबिकानाथःश्रीकंठोभ
क्तवत्सलः॥६॥भवःशर्वस्त्रिलोकेशःशितिकंठःशिवाप्रियः॥उग्रःकपर्दीका
मारिरंधकासुरसूदनः॥७॥गंगाधरोललाटाक्षःकालकालःकृपानिधिः॥भी
मःपरशुहस्तश्चमृगपाणिर्जटाधरः॥८॥कैलासवासीकवचीकठोरस्त्रिपुरांत
कः॥वृषांकोवृषभारूढोभस्मोद्धूलितविग्रहः॥९॥कामप्रियःस्मरमयस्त्रयी
मूर्तिर्गिरीश्वरः॥सर्वज्ञःपरमात्माचसोमसूर्याग्निलोचनः॥१०॥हविर्यज्ञमयः
सोमःपंचवक्त्रःसदाशिवः॥विश्वेश्वरोवीरभद्रोगणनाथःप्रजापतिः॥११॥हिर
ण्यरेतादुर्धर्षोगिरीशोगिरिशोनघः॥भुजंगभूषणोभर्गोगिरिधन्वागिरिप्रियः॥१२

कृत्तिवासाः पुरारातिर्भगवान्प्रमथाधिपः ॥ मृत्युंजयः सूक्ष्मतनुर्जगद्व्यापी ज
गद्गुरुः ॥१३॥ व्योमकेशो महासेनजनकश्चारुविक्रमः ॥ रुद्रो भूतपतिः स्थाणुरहि
र्बुध्न्यो दिगंबरः ॥१४॥ अष्टमूर्त्तिरनेकात्मा सात्विकः शुद्धविग्रहः ॥ शाश्वतः खंडप
रशुरजः पाशविमोचकः ॥१५॥ मृडः पशुपतिर्देवो महादेवोऽव्ययो हरिः ॥ पूषदं
तभिदव्यग्रो दक्षाध्वरहरो हरः ॥१६॥ भगनेत्रभिदव्यक्तः सहस्राक्षः सहस्रपा
त् ॥ अपवर्गप्रदोऽनंतस्तारकः परमेश्वरः ॥१७॥ एवमष्टोत्तरशतं नाम्नामाम्नायसं
मितं ॥ शिवाष्टशतशतीर्ईजद्यावै शूलपाणिनः ॥१८॥ यस्त्रिसंध्यं जपेच्छंभोर्ना
म्नामष्टोत्तरं शतं ॥ शतरुद्रत्रिरावृत्त्या यत्फलं प्राप्नुते नरः ॥१९॥ तत्फलं प्राप्नुयाद्

विद्वान्कृत्वा पठन्नरः ॥ एतैरष्टोत्तरशतैर्नामभिर्गिरिजन्मनः ॥२०॥ सकृद्वा पूज
येच्छंभुं कुलकोटिं समुद्धरेत् ॥ बिल्वपत्रैः प्रशस्तैश्च पुष्पैश्च तुलसीदलैः ॥२१॥
तिलाक्षतैर्यजेद्देवं जन्मुक्तो न संशयः ॥ नाम्नामेतत्पशुपतेरेकमेवापवर्गदं
॥२२॥ ॥इति श्रीशिवरहस्ये गौरीनारायणसंवादे शिवाष्टोत्तरशतं दिव्यनाम्ना
मामृतस्तोत्रं संपूर्णं ॥ ॥शंत १७४० वर्षे कार्त्तिक शुद्ध पूर्णिमायां लिखितमिदं ॥

3